त्तरम् । एतद्दर्भमयब्राह्मणपक्षेऽप्यबाधितत्वाद्ग्राह्यम् । दधिबदराक्षतमिश्रादित्यनेन दध्यादिमिश्रणमावश्यकम् । अक्षतोयवः "अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते" इति भट्टनारायणधृतकोषात् अतएव वक्ष्यमाणच्छन्दोगपरिशिष्टवचनेऽक्षतमनुक्त्वा "संयोज्य यवकर्कन्धूदधिभिरिति" निःसन्दिग्धमुक्तम् । स्वधावाचनप्रश्ननिवृत्तये नान्दीमुखाः पितरः प्रीयन्तामित्युपदेशः । तत्र स्वधां वाचयिष्य इति पितृपक्षएव प्रश्नः । अतएव तन्निवृत्तये दैव इति । दैवपक्षे नान्दीमुखाः पितरः प्रीयन्तामिति प्रश्नः । उत्तरञ्च प्रीयन्तामिति । ततः पितृपक्षे स्वधावाचनस्थानीयत्वेन वृद्धप्रमातामहेश्चेति चकारनिर्द्देशेन च स्वधोच्यतामितिवत् प्रत्येकमेव प्रीयन्तामिति पृच्छेत् । प्रत्युत्तरञ्च अस्तु स्वधेति वत् तन्त्रेणैव प्रीयन्तामिति । अत्र नान्दीमुखाः पितरइत्यादि नान्दीमुखेभ्यः पितृभ्यः इति निर्द्देशेन च "नान्दीमुखं पितृगणमिति" विष्णुपुराणेन च "मातामहेभ्यश्च तथा नान्दीमुखेभ्य एव चेति" ब्रह्मपुराणे च नान्दीमुखपदश्रुतेस्तद्विशेषणविशिष्टस्यैवाभ्युदयिके देवत्वात्त ततश्चात्रापि प्रीयन्तामितिवन्नान्दीमुखेभ्यः प्रपितामहेभ्य इत्यादि वाच्यम्" श्रा० त० रघु० । छन्दोग० "कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः । पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः । प्रतिमासु च शुभ्रासु लिखिता वा पटादिषु । अपि वाक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः । कुड्यलग्नां वसोर्धारां सप्त वारान् घृतेन तु । कारयेत् पञ्च वारान् वा नातिनीचां नचोच्छ्रिताम् । आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः । षड्भ्यः पितृभ्यस्तदनु श्राद्धदानमुपक्रमेत् । वशिष्ठोक्तविधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः । अतःपरं प्रवक्ष्यामि विशेष इह यो भवेत् । प्रातरामन्त्रितान् विप्रान् युग्मानुभयतस्तथा । उपवेश्य कुशान्दद्यात् ऋजूनेव हि पाणिना" तथा "निपातोन हि सव्यस्य जानुनो विद्यते क्वचित् । सदा परिचरेद्भक्त्या पितॄनप्यत्र दैववत् । पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान् । गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेत् । नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते । पात्राणां पूरणादीनि दैवेनैव तु कारयेत् । ज्येष्ठोत्तरकरान् युग्मान् कराग्राग्रपवित्रकान् । कृत्वार्घ्यं सम्प्रदातव्यं नैकैकस्यात्र दीयते । मधुमध्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम् । गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्ज्जितः । नचाश्नत्सु जपेदत्र कदाचित् पितृसंहिताम् । अन्यएव जपः कार्य्यः सोमसामादिकः शुभः । प्रकारोऽन्नस्य यस्तत्र तिलवद्यववत्तथा । उच्छिष्टसन्निधौ सोऽत्र तृप्तेषु विपरीतकः । सम्पन्नमिति तृप्ताः स्थः प्रश्नस्थानु विधीयते । सुसम्पन्नमितिप्रोक्ते शेषमन्नं निवेदयेत् । प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत् । अपः क्षिपेन्मूलदेशेऽवनेनिक्ष्वेति निस्तिलाः । द्वितीयञ्च तृतीयञ्च मध्यदेशाग्रदेशयोः । मातामहप्रभृतींस्तु एतेषामेव वामतः । सर्व्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च । संयोज्य यवकर्कन्धूदधिभिः प्राङ्मुखस्थितः । अवनेजनवत् पिण्डान् दत्त्वा विल्वप्रमाणकान् । तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् । उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरम् । भवेदधश्चाधराणामधोऽधः श्राद्धकर्म्मसु । तस्मात् श्राद्धेषु सर्व्वेषु वृद्धिमत्स्वितरेषु च । मूलमध्याग्रदेशेषु ईषत्सक्तांश्च निर्व्वपेत् । गन्धादीन्निःक्षिपेत् तूष्णीं तत आचामयेत् द्विजान् । अन्यत्राप्येषएव स्यात् यवादिरहितो विधिः । दक्षिणाप्लवने देशे दक्षिणाभिमुखस्य तु । दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः । अथाग्रभूमिमासिञ्चेत् सुप्रोक्षितमस्त्विति । शिवा आपः सन्त्विति च युग्मानेवोदकेन च । सौमनस्यमस्त्विति च पुष्पदानमनन्तरम् । अक्षतञ्चारिष्टञ्चास्त्वित्यक्षतानपि दापयेत् । अक्षय्योदकदानन्तु अर्घ्यदानवदिष्यते । षष्ठ्यैव नित्यं तत् कुर्य्यान्न चतुर्थ्या कदाचन । प्रार्थनासु प्रतिप्रोक्ते सर्व्वास्वेव द्विजोत्तमैः । पवित्रान्तर्हितान् पिण्डान् सिञ्चेदुत्तानपात्रकृत् । युग्मानेव स्वस्तिवाचयानङ्गुष्ठग्रहणं सदा । कृत्वा धूर्य्यस्य विप्रस्य प्रणम्यानुव्रजेत्ततः" ।

अत्र षड्भ्य इति कीर्त्तनं छन्दोगानां मातृपक्षनिरासार्थम् अन्यवेदिनां तु मातृपक्षाधिक्यमत्रास्ति "मातृश्राद्धं तु पूर्व्वं स्यात् पितॄणां तदनन्तरम् । ततो मातामहानाञ्च वृद्धौ वृद्धौ भवेत् तथा" श्रा० त० शातातपोक्तेः

कुत्र कुत्राभ्युदयिकं कर्त्तव्यं तद्दर्शितं नि० सि० ब्राह्मे "जन्मन्यथोपनयने विवाहे पुत्रकस्य च । पितॄन्नान्दीमुखान्नाम तर्पयेद्विधिपूर्व्वकम् । वेदव्रतेषु चाधानयज्ञपुंसवनेषु च । नवान्नभोजने स्नाने ऊढायाः प्रथमार्त्तवे । देवारामतडागादिप्रतिष्ठास्वुत्सवेषु च । राजाभिषेके बालान्नभोजने वृद्धिसंज्ञकान् । वनस्थाद्याश्रमं गच्छन् पूर्व्वेद्युःस्वधया पितॄन् । पूर्व्वोक्तविधिना सम्यक् तर्पयेत् कर्म्मसिद्धये" । विष्णुपुराणे "यज्ञोद्वाहप्रतिष्ठासु मेखलाबन्धमोक्षयोः । पुत्रजन्मवृषोत्सर्गे वृद्धिश्राद्धं समाचरेत्" बह्वृचकारिका-